# RRiShabhagItA from Bharatamanjari of Kshemendra

# ઋષભગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

## Document Information

Text title : RRiShabhagItA from Bharatamanjari of Kshemendra

File name : RRiShabhagItABM.itx

Category : giitaa, kShemendra

Location : doc_giitaa

Author : Kshemendra

Description/comments : kAvyamAlA 65. Bharatamanjari

Latest update : October 15, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# ઋષભગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

એતત્પિતામહેનોક્તં શ્રુત્વા સર્વં નૃપોચિતમ્ ।
સ્મૃત્વા દુર્યોધનકથાં નિઃશ્વસ્યોવાચ ધર્મજઃ ॥ ૧૩.૪૮૮॥

આશા મમાભૂદ્વિપુલા સતતં ધૃતરાષ્ટ્રજે ।
યથા વનનિવૃત્તેષુ સા માસ્માસુ વિધાસ્યતિ ॥ ૧૩.૪૮૯॥

સર્વથા યુદ્ધરુચિના પ્રત્યાખ્યાતે જનાર્દને ।
આશા વિફલતાં નીતા સા તેન મમ સંવૃતા ॥ ૧૩.૪૯૦॥

તસ્માદ્વૈપુલ્યમાયાતાસ્તદ્ભઙ્ગે દુઃસહાઃ શુચઃ ।
નિવર્તન્તે કથં નામ કથ્યતાં મે પિતામહ ॥ ૧૩.૪૯૧॥

પૃષ્ટો યુધિષ્ઠિરેણેતિ પુનઃ શાન્તનવોઽબ્રવીત્ ।
આશા સુમહતી પાર્થ દશા જીવિતહારિણી ॥ ૧૩.૪૯૨॥

હૈહયો રાજપુત્રઃ પ્રાક્સુમિત્રો નામ કાનને ।
જવાદનુસસારૈકં કુરઙ્ગં વેગવત્તરમ્ ॥ ૧૩.૪૯૩॥

સમેષુ તરુકુઞ્જેષુ શ્વભ્રેષુ વિષમેષુ ચ ।
મૃગાનુસારી સુચિરાત્સ ધન્વી ક્લમમાયયૌ ॥ ૧૩.૪૯૪॥

તતસ્તપોવનં પ્રાપ્ય દૃષ્ટનષ્ટે મૃગે પુનઃ ।
આશાવિનાશસન્તપ્તો મુનીનામવિશત્સભામ્ ॥ ૧૩.૪૯૫॥

સ તાન્પ્રણમ્ય પપ્રચ્છ કષ્ટામાશાં મહત્તમામ્ ।
મુનિસ્તં વૃષભો નામ બભાષે સસ્મિતાનનઃ ।
રાજપુત્ર કૃશામાશાં જહિ દુઃખાનુબન્ધિનીમ્ ॥ ૧૩.૪૯૬॥

ભૂરિદ્યુમ્નઃ પુરા રાજા વીરદ્યુમ્નાભિધં સુતામ્ ।
વિચિન્વન્હૃતમશ્વેન બદર્યાશ્રમમાયયૌ ॥ ૧૩.૪૯૭॥

તતસ્તપોવનં પ્રાપ્ય દૃષ્ટનષ્ટે મૃગે પુનઃ ।

આશાવિનાશસન્તપ્તો મુનીનામવિશત્સભામ્ ॥ ૧૩.૪૯૮॥

સ તાન્પ્રણમ્ય પપ્રચ્છ કષ્ટામાશાં મહત્તમામ્ ।
મુનિસ્તં વૃષભો નામ બભાષે સ સ્મિતાનનઃ ॥ ૧૩.૪૯૯॥

રાજપુત્ર કૃશામાશાં જહિ દુઃખાનુબન્ધિનીમ્ ।
ભૂરિદ્યુમ્નઃ પુરા રાજા વીરદ્યુમ્નાભિધં સુતમ્ ॥ ૧૩.૫૦૦॥

તનુર્નામ મુનિસ્તત્ર પ્રાંશુઃ કૃશતરાકૃતિઃ ।
દુઃખાન્તેનાવદત્પૃષ્ટો મા રાજન્વિક્લવો ભવ ॥ ૧૩.૫૦૧॥

ન વિદ્યતે જનઃ કશ્ચિદાશયા યો ન હીયતે ।
ન ચ પશ્યામિ તં લોકે યાચકં યોઽભિમન્યતે ॥ ૧૩.૫૦૨॥

કૃતઘ્નેષુ નૃશંસેષુ કુટિલેષ્વલસેષુ ચ ।
આશાદૌર્વલ્યમાયાન્તિ શરદીવાલ્પનિમ્નગાઃ ॥ ૧૩.૫૦૩॥

ધિક્તાં કૃશતરામાશાં કાયશોષવિધાયિનીમ્ ।
પ્રતિશ્રુતમસમ્પ્રાપ્ય હૃદયાત્પરિવર્તતે ॥ ૧૩.૫૦૪॥

પુત્રે મૃતે વા નષ્ટે વા પિતુરેકાત્મજસ્ય વા ।
આશા દહતિ ગાત્રાણિ સા કૃશાપિ મહીયસી ॥ ૧૩.૫૦૫॥

વૃદ્ધાનાં પુત્રલાભેષુ નિત્યમાશા ભવન્તિ યાઃ ।
સ્થાવિરે જીર્ણકાયાનાં તાઃ કૃશા અપિ દુઃસહાઃ ॥ ૧૩.૫૦૬॥

ભ્રામયત્યાપ્તમાત્રૈવ શોષયત્યાયતી કૃશા ।
હન્તિ મગ્ના જટિલ્યેવ ધિગાશાં મૃત્યુદાયિનીમ્ ॥ ૧૩.૫૦૭॥

ઇત્યુક્ત્વા તનયં રાજ્ઞે સ મુનિર્દિવ્યલોચનઃ ।
અદર્શયત્સ્વયં ચાભૂત્પ્રકટં ધર્મવિગ્રહઃ ॥ ૧૩.૫૦૮॥

અથ પપ્રાચ્છ ધર્મજ્ઞં ધર્મરાજઃ પિતામહમ્ ।

ઇતિ ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા ઋષભગીતા સમાપ્તા ।

*RRiShabhagItA from Bharatamanjari of Kshemendra*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*